# त्रयोदशः पाठः
# सत्सङ्गतिः

PXTLQH

सतां सङ्गतिः सत्सङ्गतिः कथ्यते। अस्मिन् संसारे यथा सज्जनाः तथा दुर्जनाः अपि सन्ति। यद्यपि पूर्वजन्मनः गुणदोषौ अपि मनुष्ये जन्मना आगच्छतः। तथापि नहि कोऽपि जनः जन्मतः दुर्जनो वा भवति अपितु मानवे संसर्गस्यापि विशेष रुपेण प्रभावः भवति। यः यादृशेन पुरुषेण सह सङ्गतिं करोति, यादृशेन पुरुषेण सह तिष्ठति, च (उपविशति), खादति, पिबति, आलापसंलापौ च कुरुते, तस्य तादृशः एव स्वभावो भवति। यदि सज्जनैः सह सङ्गतिः भवति, तर्हि नरः सज्जनः भवति। चेत् दुर्जनैः सह सङ्गतिः भवति तर्हि सः दुर्जनः भवति, इति प्रकृतिनियमः। अतएव नीतिकाराः कथयन्ति–

'संसर्गजा दोषगुणाः भवन्ति'।

सत्सङ्गेन मनुष्येषु बहवः गुणाः उद्भवन्ति। सत्सङ्गेन मनुष्यः विवेकवान् श्रद्धावान् शीलवान् परोपकारी भक्तिमान् च भवति। दुर्जनानां सङ्गकरणेन तु दुर्गुणाः एव प्रादुर्भवन्ति। सत्यमेव मानवजीवने सत्सङ्गः उन्नतेः सोपानमस्ति। अतः सर्वदा सत्पुरुषाणाम् एव सङ्गतिः कर्त्तव्या। शास्त्रस्य तु अयं निर्देशः अस्ति यत् विद्यालङ्कृतः अपि दुर्जनः परिहर्तव्यः। यथा–

"दुर्जनः परिहर्तव्यः विद्यालङ्कृतोऽपि सन्।"
मणिना भूषितः सर्पः किमसौ न भयङ्करः।।

यद्यपि वर्तमानयुगे सज्जनानाम् अभावः प्रायेण दृष्टिगोचरः भवति तथापि सत्सङ्गस्य महत्वं विज्ञाय आत्मनः कल्याणाय च प्रयत्नेन सत्सङ्गः एव करणीयः। सत्यमेव सत्सङ्गतिविषये उक्तम्–

जाड्यं धियो हरति सि चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्।
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

एका कथा प्रचलिता एकस्मिन् नीडे द्वौ शुकौ न्यवसताम्। दैववशात् एकः शुकः सन्ताश्रमे अवसत्। द्वितीयः चौरस्य गृहे न्यवसत्। सन्ताश्रमे सन्तस्य सद्विचारेण प्रभावितो भूत्वा प्रथमः शुकः सत्यं वदति स्म। परं द्वितीयः चौरस्य आचरणप्रभावेन मिथ्या वदति स्म। अतः सतां सङ्गतिः श्रेयस्करा भवतीति।

## शब्दार्थाः

संसर्गजाः–मिलने या साथ होने से उत्पन्न। बहवः–बहुत (बहुवचन)। प्रादुर्भवन्ति–उत्पन्न होते हैं। यादृशः–जैसा। सोपानम्–सीढ़ी। विद्यालङ्कृतः–विद्या से युक्त शोभयमान। असौ–यह (अदस् पु.) विज्ञाय–जानकर। जाड्यम्–मूर्खता को। धियः–बुद्धि की। दिशति–देती है। अपाकरोति– दूर करती है। प्रसादयति–प्रसन्न करती है। दिक्षु–दिशाओं में। तनोति–फैलाती है। पुंसाम्–मनुष्यों का। एकस्मिन् नीडे–एक घोंसले में । न्यवसताम्–निवास करते थे। अवसत्–रहता था। वदति स्म–बोलता था। श्रेयस्करा–श्रेष्ठ होती है।

## अभ्यासप्रश्नाः

**प्रश्न 1 निम्नलिखित प्रश्नों के उत्तर दीजिए –**

क. मानवे कस्य प्रभावः भवति ?
ख. सत्सङ्गेन मनुष्यः कीदृशः भवति ?
ग. दुर्जनानां सङ्गेन किं भवति ?
घ. उन्नत्याः सोपानं किम् अस्ति ?
ङ. शास्त्रस्य कः निर्देशः अस्ति ?
च. सत्सङ्गतिः किं करोति ?
छ. सतां सङ्गतिः कीदृशी भवति ?

## भावबोधप्रश्नाः–

**प्रश्न 2. निम्नलिखित पदों में विभक्ति, वचन एवं लिङ्ग बतायें–**

(क) सताम् (ख) संसारे (ग) दुर्जनैः (घ) नीतिकाराः
(ङ) विवेकवान् (च) आत्मनः (छ) अस्मिन् नीडे (ज) सन्ताश्रमे

**प्रश्न 3. निम्नलिखित पदों विग्रह करें और समास का नाम बतायें–**

(क) सत्सङ्गतिः (ख) गुणदोषौ
(ग) मानवजीवने (घ) सत्पुरुषाणाम्

## बोधविस्ताराः

**रिक्त स्थान की पूर्ति कीजिए –**

(क) सतां सङ्गतिः...................... कथ्यते।
(ख) सत्सङ्गेन मनुष्येषु ................ आयान्ति।
(ग) मानवजीवने सत्सङ्गः............ अस्ति।
(घ) विद्यालङ्कृतः अपि ............ परिहर्तव्यः।
(ङ) सतां सङ्गतिः ................ भवति।

**प्रश्न 4 संस्कृत में अनुवाद कीजिए–**

(क) संसार में सज्जन भी हैं।
(ख) मनुष्य पर संसर्ग का प्रभाव पड़ता है।
(ग) वर्तमान युग में सज्जनों का अभाव दिखाई देता है।
(घ) सत्सङ्ग से मनुष्य की उन्नति होती है।
(ङ) सत्सङ्गति श्रेयष्कर होती है।

**प्रश्न 5. संधि विच्छेद करते हुए संधि का नाम एवं नियम बताइए–**

यद्यपि, मनुष्योपरि, विद्यालङ्कृतः, भवतीति।

**प्रश्न 6. हिन्दी में व्याख्या करें–**

(क) सतां सङ्गतिः सत्सङ्गतिः कथ्यते।
(ख) सत्सङ्गतिः कथय किं न करोति पुंसाम्।
(ग) दिक्षु तनोति कीर्तिम्।
(घ) सत्सङ्गतिः श्रेयस्करा भवतीति।

**प्रश्न 7.** (क) सत्सङ्गति पर संस्कृत में पाँच वाक्य बनाइए।
(ख) सत्सङ्गति के दो पद्य कण्ठस्थ कीजिए।